सर्वे दुःखसंभवा दुःखकरा भवंति ॥१२॥ आवन्ना दीहमद्धाणं संसारंमि अणंतए तम्हा सव्वदिसं पस्स अप्पमत्तो परिव्वए ॥१३॥ ते अज्ञानवा
दिनः अनंतके अंतरहिते संसारे दीर्घं अनाद्यंतं अध्वानं वर्त्मरूपं मार्गं प्राप्ताः तस्मात्कारणात् संसारप्राप्तानां सर्वदिशः मुनिः पश्य प्रेक्षस्व मु
निः अप्रमत्तः संयमाध्वनि चरेत् गच्छेत् ॥१३॥ बहिया उड्ढमादाय नावकंखे कयाइ वि पुव्वकम्मक्खयट्ठाए इमं देहं समुद्धरे ॥१४॥ जीवो धनधा
न्यादिबहिर्भूतेभ्यः ऊर्ध्वं मोक्षं आदाय ज्ञात्वा कदाचिदपि विषयादीनां कांक्षेत् न वांछेत् पूर्वकर्मक्षयार्थं इमं देहं आहाराद्यैः समुद्धरेत् ॥१४॥ विवि
च कम्मुणो हेउं कालकंखी परिव्वए मायं पिंडस्स पाणस्स कडं लद्धूण भक्खए ॥१५॥ कालकांक्षी अनुष्ठानादिप्रस्तावज्ञो मुनिः कर्मणा
हेतुं कारणं विविच्य पृथक्कृत्य पिंडस्य आहारादेः पानस्य तोयादेः पान मात्रां गृहस्थैः स्वार्थं कृतं लब्ध्वा लब्धं कृतं येन तद्भुंजीत आहारयेत्
॥१५॥ सन्निहिं च न कुव्वेज्जा लेवमायाए संजए पक्खी पत्तं समादाय निरवेक्खो परिव्वए ॥१६॥ संयतः साधुः लेपमात्रयापि संनि
धिं अशनादिस्थापनं न कुर्वीत पक्षीव पक्षी यथा पक्षसंचयं न धत्ते तथा गृ दी त्वा अपरिबद्धः निरपेक्षः भिक्षुः पात्रं उपकरणं समादाय गृहीत्वा निर
पेक्षो निरीहः सन् परिव्रजेत् गच्छेत् ॥१६॥ एसणासमिओ लज्जू गामे अ नियओ चरे अप्पमत्तो पमत्तेहिं पिंडवायं गवेसए ॥१७॥ लज्जाशब्देन
संयमः तद्वान् साधुः एषणासमितः सन् ग्रामे नगरादौ अनियतो चरेत् अप्रमत्तः सन् प्रमत्तेभ्यो गृहस्थेभ्यः पिंडपातं लि
प्सां गवेषयेत् विलोकयेत् ॥१७॥ एवं से उदाहु अणुत्तरनाणी अणुत्तरदंसी अणुत्तरनाणदंसणधरे अरहा नायपुत्ते भगवं वेसालिए विया
हिए त्ति बेमि ॥१८॥ एतत् पूर्वोक्तं स भगवान् उदाहृतवान् उक्तवान् किंभूतो भगवान् अनुत्तरज्ञानी सर्वोत्तमज्ञानी सर्वोत्तमज्ञानवान् पुनः किंभूतो
अनुत्तरदर्शी सर्वोत्तमो दर्शनशीलः अनुत्तरज्ञानदर्शनधरः सर्वोत्तमज्ञानदर्शनधारकः पुनः किंभूतः अर्हन् इंद्रपूजायोग्यः पुनः किंभूतः ज्ञा
तपुत्रः सिद्धार्थपुत्रः पुनः किंभूतः भगवान् समग्रैश्वर्यादियुक्तः पुनः किंभूतः वैशालिकः [illegible] युक्तः पुनः किंभूतः व्याख्यानादिकवि
ता ॥ [illegible] ॥
[illegible] ॥ जहाएसं समुद्दिस्स कोइ पोसेज्ज एलयं ओयणं जवसं देज्जा पोसेज्जा वि सयंगणे ॥१॥ यथा कोऽपि १३
पि पुमान् आदेशं प्राघुर्णं समुद्दिश्य आश्रित्य एलकं पोषयेत् पुष्टं कुर्यात् तस्य ओदनं यवसं [illegible] गादि दद्यात् अपि स्वांगणे

स्वांगणे पोषयेत् पुष्टं कुर्यात् ॥१॥ तओ से पुट्ठे परिवूढे जायमेए महोदरे पीणिए विउले देहे आएसं परिकंखए ॥२॥ ततः तस्मात् स उरभ्रः
पोषितः विशाले समनि आदेशं प्राघुर्णं प्रतिकांक्षति वांछति वध्यमानः किंभूतः सबलः पुष्टः उपचितमांसः पुनः किंभूतः परिवृढः समर्थः पुनः किंभूतः जातमे
दः उपचितचतुर्धातुः पुनः किंभूतः महोदरः स्थूलोदरः पुनः किंभूतः प्रीणितः यथाकालं प्रीतिं प्राप्तः ॥२॥ जाव न एइ आएसे ताव जीवइ से दुही अ
ह पत्तंमि आएसे सीसं छेत्तूण भुज्जई ॥३॥ यावत् आदेशः प्राघुर्णको नागच्छति तावत् स उरभ्रः दुःखी जीवति किंभूतो दुःखी दुःखवान् अथ अनंतरं
ते आदेशे प्राघुर्णे शीर्षं मस्तकं छित्वा भुज्यते ॥३॥ जहा खलु से उरब्भे आएसाए समीहिए एवं बाले अहम्मिट्ठे ईहई न
रयाउयं ॥४॥ यथा खलु निश्चितं स उरभ्रः आदेशाय प्राघुर्णाय समीहितः कल्पितः एवं बालो मूर्खो नरकायुष्यं ईहते वांछति किंभूतो बालो अधर्मि
ष्ठो धर्मद्वेषी ॥४॥ हिंसे बाले मुसावाई अद्धाणंमि विलोवए अन्नदत्तहरे तेणे माई कन्नु हरे सढे ॥५॥ इत्थीविसयगिद्धे य महारंभपरिग्गहे भुं
जमाणे सुरं मंसं परिवूढे परंदमे ॥६॥ अयकक्करभोई य तुंदिल्ले चियलो हिए आउयं नरए कंखे जहाएसं व एलए ॥७॥ बालो मूर्खो नरके
आयुः कांक्षते वांछति किंभूतो बालः हिंस्रः प्राणिघातकः पुनः किंभूतः मृ षा वादी असत्यभाषकः पुनः किंभूतः अध्वनि मार्गे विलुंपकः मोषकः
मार्गस्य तस्करः पुनः किंभूतः अन्यदत्तहरः अन्यैर्दत्तं हरतीति चोर य ति अन्यदत्तहरः पुनः किंभूतः स्तेनः चौर्यवृत्तिः पुनः किंभूतः मायी वं
चकः पुनः किंभूतः कं नु हरः कस्यार्थं हरिष्यामीति अभिप्रायवान् री पुनः किंभूतः शठो वक्राचारः ॥५॥ पुनः किंभूतः स्त्रीविषये गृद्धः
स्त्रीलोलुपः पुनः महारंभो अनेकजीवघातव्यापारः पुनः किंभूतः परि ग्रहः धनधान्यादिसंचयः पुनः किंभूतः सुरां मांसं च भुंजानः मद्यमांसभ
क्षकः पुनः किंभूतः परिवृढः समर्थः पुनः किंभूतः परंदमः अन्यदमनशीलः ॥६॥ पुनः किंभूतः अजकस्य छागस्य यच्चनकवत् चर्व्यमानं कर्करायते
तच्छाकर्करं तद्भोजी अजकर्करभोजी पुनः किंभूतः तुंदिलः स्थूलोदरः पुनः किंभूतः चितलोहितः उपचितरक्तः कटवत् पक्वफल इव यथा [illegible]
अज आदेशं प्राघुर्णं कांक्षति ॥७॥ आसणं सयणं जाणं वित्तं कामाणि भुंजिया दुस्साहडं धणं हिच्चा बहुं संचिणिया रयं ॥८॥ तओ कम्म
गुरू जंतू पच्चुप्पन्नपरायणे अय व्व आगयाएसे मरणंतंमि सोयई ॥९॥ ततोऽनंतरं जंतुर्जीवः आसनं शयनं पल्यंकादिः यानं रथादि वित्तं
द्रव्यं कामान् शब्दादीन् भुक्त्वा आसनादिभोगेन दुःखाहृतं दुःखोपार्जितं हित्वा त्यक्त्वा बहु धनं रजोऽष्टप्रकारं कर्म संचित्य उपार्ज्य मरणांते म
रणावसरे शोचते किंभूतो जंतुः कर्मगुरुः कर्मणा गुरुः पुनः किंभूतः प्रत्युत्पन्नपरायणः वर्तमानकालसाधकः एतावन्मात्रमस्ति इत्यनुसारी कट
व अज इव यथा अजः आगते आदेशे प्राघुर्णके शोचते ॥९॥ तओ आउपरिक्खीणे चुया देहा विहिंसगा आसुरीयं दिसं बाला गच्छंति अ

वरा नमं ॥ मतः श्रोवलाद् ज्ञे नरं बालाः पृथ्व्याद्युपरिक्षीणो युतदेहाः सुष्टु देहाः संतः आसुरीं दिशं नरकगतिं गच्छंति किं च बाला विहिंसकाः प्राणिघा
तकाः पुनः किं० अजवत् । कर्म्मवशाः पुनः किं पश्र मोयुक्तत्वाद् अमसः पापवंतः
इत्था दाशिणी पदेशे सद संबंधारयनरो अपन्नं श्रवणे नोक्ता सयास्खं उद्दारप यथा कोऽपि नरः काकिण्याः कृ
कार्जीति नरस्तासा स्वपायाः देवीः काकीदणानां सहस्रं हारयेत् तथा अपथ्यं आम्रफलं
अ।सूफलं भुक्त्वा राज्यं हारयेत् हारितवान्॥ एवं माणुस्सगा कामा देव सहस्सगुणि आयुक्तो आ
उयं कामाय दिव्विया ॥ एवं देवकामानां देवकामेभ्यो मानुष्यकाः कामाः काकिण्याम्रफलतुल्याः आयुर्देवसंबं
धिनी दिव्यस्त्री देवलवत्सदाः कामलोकाः मनुष्यायुःकामापेक्षया सहस्रगुणिताः संति देवलोकाः काषीपणसहस्र
सदृशाः अणेगवासानउया जा सा पन्नवओ ठिई जाणि जीयंति दुम्मेहा ऊणे वाससयाउए यानेकवर्षायुतानि वर्ष संख्यार
हिनाः अनासाग रोपमस्थितिः स एव जावन्तः कि यावन्तः स्थितिः स्यात् उ में धसो मूर्खा विषयैः जिताः संतः वर्षशतायुषि सति दिव्यविष
यान् हारयंति इन्हां यति सिवर्ग ण या मूलं एणं निग्गया एगो ऽत्थ लभइ लाभं एगो मूलेण आगओ
एगो मूलं पि हारित्ता आगओ तत्थ वाणिओ ववहारे उवमा एसा एवं ध म्मविया णह यथा त्रयो वणिजो मूलं मूलराशिं गृहीत्वा
स्वस्थानात् निर्गताः तत्र तेषां एको वणिक् कलाज्ञो उत्रपयेषु मध्येऽसौ विशिष्टं लाभं प्राप्नोति द्वितीयो नकलाज्ञो मूलधनेन व्या
गतः स्वस्थानं ॥ एकस्तृतीयो धूतादि व्यसनासक्तो व्यवसायं अकुर्वन् मूलं मूलधनं अपि हारयेत् हारयित्वा स्वस्थानं आगतः
एषा व्यवहारविषया उपमा व्यवहारविषये दृष्टांतः एवं वक्ष्यमाणन्यायेन धर्मे धर्मविषये जानीत ज्ञापयत माणुसत्तं
भवे मूलं लाभो देवगई भवे मूलच्छेएण जीवाणं नरयतिरिक्खत्तणं धुवं जीवानां मानुष्यत्वं मूलं स्यात् नरत्वात् देवगति ल्लाभस्तदे
नु जीवानां मूलच्छेदेन नरत्वहान्या नरकत्वं ध्रुवं स्यात् अर्थं लाव त्रयः संसारेणो जीवानरत्वं प्राप्ताः तत्रैको मार्दवादिमध्यमारंभप्र
कोपत्वा मीढीधनवणिग्वत् एवं नरत्वं लभते द्वितीयः सराग संयमेन लाभवणिक् देवेषु उत्पन्नः तृतीयः सावद्ययोगैः छिन्नमूलवणिक्
नु नरकेषु तिर्यक्षु चोत्पन्नाः॥ दुहओ गई बालस्स आवई वहमूलिआ देवत्तं माणुसत्तं च जं जिए लोलयासढे बालस्य रागद्वे
षाकुलस्य द्विधागतिर्नरकतिर्यग्गतिरूपा स्यात् बालस्य वधमूलिका प्राणवधः कारणं यस्याः आपत्तिः एता वता यत्र जलं हिंसादि

तिर्यक्त्वं २७

यत्र तत्र जले जन्म इष्टे यत्र च्छद्मस्थान्तरे तु लोलता शाठ्यं आरंभः इतः जीवन्तं वंचकः सपापः देवत्वं मानुषत्वं जितो हारितः॥२८॥ तत्रो जिए सयं होइ दुवि
हं दुग्गई गए दुल्लहा तस्स उम्मग्गा अद्धाए सुइरादवि ॥ तत्तो जीवो द्विविधां दुर्गतिं गतः सन् देवत्वनृत्वहारणात् सदा जितः पराजितः स्यात् त
स्य जीवस्य सुचिरात् अपि बहुतरात् अपि कालेन उन्मार्गात् निर्गमनं दुर्लभं २ स्यात् ॥२९॥ एवं जिअं सपेहाए तुलिआ बालं च पं
डियं मूलियं ते पवेसंति माणुस्सं जोणि मेंति जे ॥३०॥ ते मूलपदं त्रिवणिक् दृष्टांताः जीवाः एवं जितं देवत्वनृत्वहारित्वेन जितं लोकं सं
प्रेक्ष्य बालत्वं पंडितत्वं च तुलयित्वा ये मूलिकं मूलधनं प्रवेशयंति ते मनुष्ययोनिं मानुषीं योनिं आयांति ॥३१॥ वेमायाहिं सिक्खा
हिं जे नरा गिहसुव्वया उवेंति माणुसं जोणिं कम्मसच्चा हु पाणिणो ॥३२॥ ये नरा विमात्राभिः विविधप्रकाराभिः शिक्षाभिः प्रकृति भद्रक
त्वादिरूपाभिः गृहिसुव्रता गृहवासेऽपि सत्सुव्रता अणुव्रतादिधारकाः संति ते मनुष्यजन्म लभंते । सत्यकर्माणो यस्मात् कर्मसत्याः प्रा
णिनो मानुषीं योनिं प्राप्नुवंति ॥३३॥ जेसिं तु विउला सिक्खा मूलियं ते अइच्छिया सीलवंता सविसेसा अदीणा जंति देवयं ॥३४॥
येषां जीवानां विपुला विस्तीर्णा शिक्षा ग्रहणासेवनादिका अस्ति ते जीवाः मूलकं मनुष्यत्वं अतिक्रांताः संतः देवत्वं यांति प्राप्नुवंति
किं भूता जीवाः शीलवंतः सदाचाराः पुनः किं भूताः सविशेषाः सविशेषगुण युक्ताः पुनः किं भूताः अदीनाः दीनतारहिताः महोपसर्गेऽपि सहिष्णवः ॥
एवं अदीणवं भिक्खुं अगारिं च वियाणिआ कहण्णु जिच्चमेलिक्खं जिच्चमाणो न संविदे ॥३५॥ एवं अमुना प्रकारेण यतमानो बुधः अदीनं
अदीनवंतं भिक्षुं साधुं अगारिणं गृहस्थं वा विज्ञाय ज्ञात्वा तु इति वितर्के ईदृशं देवत्वं प्राप्तवान् कथं जितः स्यात् एवं कथं न संविदे
न जानाति अपितु संविदे इदं सुविवेकेन जानाति अयं जिच्चमाणो इति ईदृशं देवत्वं हारयेत् ॥३६॥ ...
... जहा कुसग्गे उदगं समुद्देण समं मिणे एवं माणुस्सगा कामा देवकामाण अंतिए ॥३७॥ यथा कुशाग्रोदकं समुद्रेण सं
मे मितुं यत्न कुर्यात् वा ... उदकं सिंधुजलं ... एवं देवकामानां देवलोकानां अंतिके समीपे मानुष्यकाः का
मलोगा ज्ञातव्याः मनुष्योपमा देवलोगाः कुशाग्रोदकतुल्या लोगाः परस्परं महदंतरं ज्ञेयं ॥३८॥ कुसग्गमेत्ता इमे कामा संनिरुद्धं मि आ
उए कस्स हेउं पुराकाउं जोगक्खेमं न संविदे ॥३९॥ ... इमे मानुष्यकाः कामभोगाः कुशाग्रमात्राः अल्पा यत्र
अमाणाः संति ... कस्य हेतोः कस्मात् कारणात् पुरस्कृत्य अग्रे कृत्वा जोगक्षेमं विशिष्टधर्मप्राप्तस्य पालनं न संविदे न जानाति यो जानाति स
धर्मं करोति ॥ ... इह कामाणियट्टस्स अत्तट्ठे अवरज्झई सोच्चा नेआउयं मग्गं जं भुज्जो परिभस्सई ॥४०॥

उत्तरा॰
२५

इहा हीन्मते कः मानिवृत्तस्य कामासक्तस्य नरस्य आत्मार्थं अपराध्यति नस्यति नानाविधां सुपयाति यत्नां यस्मा न्नेयायिकं मोक्षमार्गं श्रुत्वा
पतितश्च भूयः पुनः परिभ्रस्यति पतति ॥२६॥ इह कामानियट्टस्स अत्तट्ठे नावरज्झई पूइदेहनिरोहेणं भवे देवि त्ति मे सुयं ॥२७॥ इह
हीन्मते कामाद्विनिवृत्तस्य लोभाच्चारहितस्य नरस्य आत्मार्थो नापराध्यति न नस्यति स कामनिवृत्तो नरः पूतिदेहनिरोधेन कुत्सित औदारिकदे
हत्यागेन देवः सिद्धो वा भवेत् इति मया गुरुमुखात् श्रुतं ॥२८॥ इड्ढी जुई जसो वण्णो आउं सुहमणुत्तरं भुज्जो जत्थ मणुस्सेसु तत्थ से उववज्जई
॥२८॥ स यः पुनर्नरो मनुष्येषु पुनः स्वर्गलोकं च्युत्वा ऋद्धिः स्वर्णादिः द्युतिः दीप्तिः यशः पराक्रमजनितं वर्णो गौरतादिगुणः श्लाघापत्रो सा आयुः सुखं अ
नुत्तरं प्रधानं सुखं यत्र तत्र नरस्तत्र संजीव उत्पद्यते ॥२९॥ बालस्स पस्स बालत्तं अहम्मं पडिवज्जिया चिच्चा धम्मं अहम्मिट्ठे नरएसु उववि
ज्जई ॥३०॥ अहो लोक बालस्य मूर्खस्य बालत्वं मूर्खत्वं पश्य विलोकय यो बालो धर्मिष्ठः मनुष्यधर्मं प्रतिपद्य धर्मं त्यक्त्वा नरकेषु उत्पद्यते ॥
॥३१॥ धीरस्स पस्स धीरत्तं सव्वधम्माणुवत्तिणो चिच्चा अहम्मं धम्मिट्ठे देवेसु उववज्जई ॥३२॥ धीरस्य धीरत्वं पश्य किं यत् धीरस्य सर्वधर्मा
नुवर्तिनो जिनधर्मानुरक्तस्य स धीरो धर्मिष्ठः सन् अधर्मं त्यक्त्वा र देवेषु उत्पद्यते ॥३३॥ तुलिआण बालभावं अबालं चेव पंडिए
चइऊण बालभावं अबालं सेवए मुणी त्ति बेमि ॥३४॥ पंडितो मु नि बाल भावं मूर्खत्वं अबालं च पंडितभावं तोलयित्वा वि
चार्य बालभावं त्यक्त्वा अबालं पंडितभावं सेवते ॥ इअ एलमीअं सत्तमं अज्झयणं संमत्तं ॥७॥
अनंतरं यस्मात् कामनिवृत्तिः स च निर्लोभस्य भवति अतोऽष्टमम ध्ययनं कापिलीयं आह ॥ अत्र कपिल
अधुवे असासयंमी संसारंमि दुक्खपउराए किं नाम होज्ज तं कम्मयं जेणाहं दुग्गइं न गच्छेज्जा ॥१॥ नामेति संभावने संसारे तत्कर्म किं स्या
त् यत् किं भवेत् येन कर्मणा अहं दुर्गतिं न गच्छेयं न यामि किं च संसारे अध्रुवे न वर्तते अशाश्वते अस्थिरे पुनः किं च दुःखैः संकुले
स पुनः किं च दुःखप्रचुरः दुःखसमूहजाले ॥१॥ विजहित्तु पुव्वसंयोगं न सिणेहं कहिंचि कुव्वेज्जा असिणेह सिणेहकरेहिं दोसपओसेहिं
मुच्चई भिक्खू ॥२॥ भिक्षुः पूर्वसंयोगं मातृपित्रादि विजहात् त्यक्त्वा क्वचित् द्रव्ये स्थाने वस्तुनि स्नेहं न कुर्वीत किं च भिक्षुः स्नेहकरेषु पि
त्रकलत्रादिषु अस्नेहः स्नेहरहितः स भिक्षुः दोषैः मिथ्यात्वैः प्रदोषैः परत्र नरकप्राप्त्यादिभिः मुच्यते ॥२॥ तो नाणदंसणसमग्गो हियनिस्सेसाय
सव्वजीवाणं तेसिं विमुक्खणट्ठाए भासई मुणिवरो विगयमोहो ॥३॥ ततोऽनंतरं मुनिवरः केवली सर्वजीवानां हितनिःश्रेयसा
य मोक्षरूपाय तेषां विमोक्षणार्थाय अष्टविधकर्मबन्धनमोचनाय भाषते किं च मुनिवरः ज्ञानदर्शनसमग्रः सम्यक्त्व

केवली पुनः किं च विगतमोहो मोहरहितः ॥३॥ सव्वं गंथं कलहं च विप्पजहे तहाविहं भिक्खू सव्वेसु कामजाएसु पासमाणो न लिप्पई ता
ई ॥४॥ भिक्षुः सर्वं अष्टविधं बाह्य अभ्यंतरं ग्रंथं धनं मिथ्यात्वादि च अपरं कलहं विप्रजह्यात् त्यजेत् सर्वेषु कामजातेषु शब्दादिषु विषयसमू
हेषु विपाककटुतां दोषं जानं पश्यन् कर्मणा न लिप्यते किं च भिक्षुः तायी पापरक्षकः ॥४॥ भोगामिसदोसविसन्ने हियनिस्सेयसबुद्धि
वोच्चत्थे बाले य मंदिए मूढे बज्झई मच्छिआ व खेलंमि ॥५॥ बालो मूर्खः कर्मणा बध्यते किं च बालः भोगामिषविषन्नः भोगा एव दे
हामिषं तेन दोषात्मकेन दोषस्तत्र विशेषेण सन्नो मग्नः पुनः किं च हितनिश्रेयसः स्वबुद्धिविपर्यस्तहितं स्वहितं निःश्रेयसः मोक्षस्तयो
बुद्धिस्तत्र विपर्यस्तो विमुखः पुनः किं च मंदो धर्मानुद्यतः पुनः किं च मूढो मोहाकुलचित्तः केव मक्षिकेव यथा मक्षिका खेले श्लेष्मणि
बध्यते ॥५॥ दुप्परिच्चया इमे कामा नो सुजहा अधीरपुरिसेहिं अह संति सुव्वया साहू जे तरंति अतरं वणिया व ॥६॥ अधीरपु
रुषैः असत्त्वैः इमे प्रत्यक्षाः कामा दुःपरित्याज्याः स्फुटः परं सुजहा सु खत्याज्या न विषसंश्लिष्टकमवन्न अथ पुनः ये सुव्रताः सुष्ठु व्र
ताः साधवः संति ते साधवो दुस्तरं तरणाय अशक्यं भवौघं तरंति के इ व वणिजः इव यथा वणिजः पोतेन समुद्रं तरंति ॥६॥
समणा मु एगे वयमाणा पाणिवहं मिया अयाणंता मंदा न र यं गच्छंति बाला पावियाहिं दिट्ठीहिं ॥७॥ एके अन्यतीर्थिकाः
प्राणवधं मृगा इव अज्ञाः अज्ञानेन एवं वदमानाः भाषमाणाः सेति य वं किं वयं श्रमणास्तपस्विनः ते मंदा मिथ्यात्वमहारोगग्रस्ताः पापिकाभि
र्दृष्टिभिः मिथ्यादृष्टिभिः नरकं गच्छंति कथं ते बालाः विवेकहीनाः ॥७॥ न हु पाणिवहं अणुजाणे मुच्चेज्ज कयाइ सव्वदुक्खाणं
एवायरिएहिं अक्खायं जेहिं इमो साहुधम्मो पन्नत्तो ॥८॥ साधुः प्राणवधं जीववधं नानुजानन् अपि कदाचित् कस्मिंश्चित्
काले सर्वदुःखैः शारीरमानसैः नैव मुच्यते एवं आचार्यैः आख्यातं यैः आचार्यैः अयं साधुधर्मः प्रज्ञप्तः ॥८॥ पाणे य नाइवाएज्जा
से समिए त्ति वुच्चई ताई तओ से पावयं कम्मं निज्जाइ उदगं व थलाओ ॥९॥ यः साधुः प्राणान् नातिपातयेत् न घातयेत् स स
मितः समिति वान् उच्यते किं च तायी जीवरक्षाकरः स अघात्मनः तस्मात् साधोः पापकं कर्म निर्याति गच्छति कस्मात् इव
स्थलात् उदकं अधो निर्याति गच्छति ॥९॥ जगनिस्सिएहिं भूएहिं तसनामेहिं थावरेहिं च नो तेसिं मारभे दंडं मणसा वयसा कायसा
चेव ॥१०॥ यः साधुः लोके जगन्निश्रितेषु जगदाश्रितेषु त्रसेषु द्वीन्द्रियादिषु स्थावरेषु पृथिव्यादिषु च मनसा वचसा कायेन
दंडं वधं न आरभेत न कुर्यात् ॥११॥ अत्र तीर्थान्तरीयाः ... सुद्धेसणाओ नच्चाणं तत्थ ठवेज्ज भिक्खू अप्पाणं जायाए

२५

मधुर्द

MEMORIAL

उत्तरा०सू०
२६

घासमेसिज्जा रसगिद्धे न सिया भिरकाए ॥१२॥ भिक्षुः शुद्धेषणां निर्दोषणां ज्ञात्वा तत्र एषणायां आत्मानं स्थापयेत् निवेशयेत् यात्रायै
:संयमनिर्वाहार्थं ग्रासं आहारं एषयेत् विलोकयेत् भिक्षाको यतौ रसेषु स्निग्धादिषु गृद्धो न स्यात् ॥१२॥ पंताणि चेव सेवेज्जा सीयपिंडं पु
राणकुम्मासं अदुवा बुक्कसं पुलागं वा जवणट्ठाए निसेवए मंथुं ॥१२॥ साधुः यापनार्थं शरीरनिर्वाहार्थं प्रांतानि नीरसानि अन्नपानानि
शीतपिंडं शीतलं आहारं पुराणान् जीर्णान् कुल्माषान् अथवा बुक्कसं मुद्गमाषादि नरविकानिष्पन्नं मंथुं पुलाकं असारं वल्लचणकादि स
वेत आहारार्थं गृह्णाति तथा मंथुं बदरचूर्णं तिष्ठवदरोवनेत् ॥१२॥ जे लक्खणं च सुविणं च अंगविज्जं च जे पउंजंति न हु ते समणा वुच्च
ति एवं आयरिएहिं अक्खायं ॥१३॥ ये साधवो लक्षणं पुरुषादिदेहलक्षणं स्वप्नं शुभाशुभस्वप्नं निमित्तं अंगविद्यां च प्रयुंजते साधयंति च ये
ये साधवो अंगविद्यां स्फुरणादि प्रयुंजते साधयंति कुर्वंति ते श्रमणाः साधवो न वाच्यते न कथ्यंते एवं आचार्यैः आख्यातं कथितं ॥१३॥ इ
ह जीवियं अणियमेत्ता पब्भट्ठा समाहिजोएहिं ते कामभोगरसगि गिद्धा उववज्जंति आसुरे काए ॥१४॥ ये इह जीवितं
ते तपसा अनियम्य नियंत्र्य समाधियोगात् चित्तस्वास्थ्य योगात् म नो वाक्काययोगेभ्यः भ्रष्टाः पतिताः भवंति ते जीवाः कामभोगर
सगृद्धाः कामभोगलोलुपा मनः आसुरकाये उत्पद्यंते ॥१४॥ त तो वि य उव्वट्टित्ता संसारं बहुं अणुपरियडंति बहुकम्मलेव
लित्ताणं बोही होइ सुदुल्लहा तेसिं ॥१५॥ ते जीवाः ततो पि असुर का यात् उद्धृत्य निःसृत्य बहुं संसारं अनुपरियट्टंति भ्रमंति तेषां बहु
कर्मलिप्तलिप्तानां बोधिः जिनधर्मप्राप्तिः सुदुर्लभा दुर्लभा प्राप्तुमशक्या ॥१५॥ कसिणं पि जो इमं लोयं पडिपुन्नं दलेज्ज इक्कस्स तेणावि
से न संतुस्से इइ दुप्पूरए इमे आया ॥१६॥ यः पुरुषः कृत्स्नं संपूर्णं इमं समस्तं लोकं प्रतिपूर्णं धनादिपूर्णं कस्मैचित् एकस्मै दद्यात् तेनापि दानेन स जीवो न तुष्यति अयं आत्मा दुःखेन पूर्यते अतो दुःपूरः ॥१६॥ जहा लाहो तहा लोहो
लाहा लोहो पवड्ढई दोमासकयं कज्जं कोडीए वि न निट्ठियं ॥१७॥ यथा लाभो द्रव्यप्राप्तिः तथा लोभः स्यात् लाभात् लोभः प्रवर्धते द्वा
भ्यां माषाभ्यां स्वर्णस्य कृतं कार्यं मासद्वयेन सुवर्णेन यत् कार्यं कोट्यापि न निष्ठितं तद्दीनं द्रव्याणां अधिकं वाञ्छति ॥१७॥ नो रक्ख
सीसु गिज्झेज्जा गंडवच्छासु णेगचित्तासु जाओ पुरिसं पलोभित्ता खेलंति जहा व दासेहिं ॥१८॥ साधुः राक्षसीषु ज्ञानादि जीवितहरास
स्त्रीषु नैव गृद्धो न तन्मयो भवेत् न स्यात् किंभूतासु राक्षसीषु गंडवक्षासु उच्चयुक्तहृदयासु पुनः किंभूतासु अनेकचित्तासु चंचलचित्तासु
याः स्त्रियः पुरुषं कुलीनमपि प्रलोभ्य मायावाक्यैर्विप्रतार्य दासवत् क्रीडंति ॥१८॥ नारीसु नोपगिज्झेज्जा इत्थीविप्पजहे अणगारे ध
म्मं च पेसलं नच्चा तत्थ ठवेज्ज भिक्खु अप्पाणं ॥१९॥ अनगारो यती नारीषु नोपगृध्यते स्नेहेन गृद्धिं न कुर्यात् तथा स्त्रियो विविधप्रकारैः
प्रत्याख्यातुं शक्नोति अपरं भिक्षुः पेशलं धर्मं ज्ञात्वा तत्र धर्मे आत्मानं स्थापयेत् ॥१९॥ इइ एस धम्मे अक्खाए कविलेणं च विसुद्धपन्नेणं त
रिहिंति जे उ काहिंति तेहिं आराहिया दुवे लोग ति बेमि ॥२०॥ इत्यमुना प्रकारेण कपिलेन ऋषिणा एष धर्मः आख्यातः किंभूतेन कपिले
न विशुद्धप्रज्ञेन निर्मलज्ञानेन ये पुरुषाः ये धर्मं करिष्यंति ते संसारं तरिष्यंति तैः द्वौ लोकौ आराधितौ इति ब्रवीमि ॥२०॥ इति कापिलीय
अध्ययनं अष्टमं संपूर्णं ॥८॥ सर्वे ... स्यात् अतः अष्टमं ... अध्ययनं ॥८॥ अथ नमिप्रव्रज्या ॥ चइ
ऊण देवलोगाओ उववन्नो माणुसंमि लोगंमि उवसंतमोहणिज्जो सरई पोराणियं जाई ॥१॥ नमिनृपः सहस्रदेवलोकात् च्युत्वा म
नुष्यलोके उत्पन्नः किंभूतो नमिः उपशांतः मोहनीयोदयरहितः ततः पूर्वं पौराणिकीं चिरंतनीं जातिं पूर्वजन्म स्मरति ॥१॥ जाई सरित्तु
भयवं सहसंबुद्धो अणुत्तरे धम्मे पुत्तं ठवित्तु रज्जे अभिनिक्खमई न मीराया ॥२॥ नमीराजा जातिं पूर्वजन्म स्मृत्वा अनुत्तरे सर्वोत्तमे
धर्मे जिनधर्मे स्वयं आत्मना प्रतिबुद्धः सन् राज्ये पुत्रं स्थापयि त्वा अभिनिष्क्रामति गृहात् निर्गच्छति किंभूतो नमिः भगवान् बु
द्धिमान् ॥२॥ सो देवलोयसरिसे अंतेउरवरगओ वरे भोए भुंजि तु नमीराया बुद्धो भोगे परिच्चयई ॥३॥ स नमिः प्राक्तनं ज्ञा
त्वा अंतःपुरगतो रम्यान् भोगान् सन् देवलोकसदृशान् भु क्त्वा राजा इदानीं प्रतिबुद्धो ज्ञानवान् सन् भोगान् परित्यज
ति ॥३॥ महिलं सपुरजणवयं बलमोरोहं च परियणं सव्वं चिच्चा अभिनिक्खंतो एगंतमहिट्ठिओ भयवं ॥४॥ भगवान् धैर्यवान् न
मिः सपुरजनपदां नगरदेशसहितां मिथिलां नगरीं बलं हस्त्यादि चतुरंगं अवरोधं अंतःपुरं परिजनं सर्वं त्यक्त्वा अभिनिष्क्रांतः उप
विष्टः किंभूतः भगवान् एकांतं अधिष्ठितः मोक्षमार्गं आसेवनाय आश्रितः ॥४॥ कोलाहलगब्भूयं आसी महिलाए पव्वयंतंमि तइया
रायरिसिंमि नमिंमि अभिनिक्खमंतंमि ॥५॥ तस्मिन् नमौ राजर्षौ प्रव्रजति दीक्षां गृह्णाति अभिनिष्क्रामति गृहात् निर्गच्छति सति तदा प्रस्ता
वे मिथिलायां कोलाहलकरूपं तत्र दिग्भूतं कलं मयं शब्दाकुलं आसीत् तदा तं किंचन मोहादुःखेन शब्दान् अकरोत् परित्यक्ताः इति अर्थः
भवति ॥५॥ अब्भुट्ठियं रायरिसिं पव्वज्जाठाणमुत्तमं सक्को माहणरूवेण इमं वयणमब्बवी ॥६॥ शक्रेन्द्रः उत्तमं प्रव्रज्याक्षणं प्र
व्रज्यां दीक्षास्थानं अभ्युत्थितं उद्यतं राजर्षिं ब्राह्मणवेषेण आगत्य इदं वक्ष्यमाणं वचनं अब्रवीत् ॥६॥ किं नु भो अज्ज महिलाए
कोलाहलगसंकुला सुव्वंति दारुणा सद्दा पासाएसु गिहेसु य ॥७॥ नु वितर्के हे आर्य अमंत्रणे तान् भो अद्य मिथिलायां प्रासादेषु

२६

उत्तरवृत्ति
१७

परगृहेषु कोलाहलकसंकुला बहुकलकलशब्दव्याप्ताः दारुणाः रौद्राः शब्दाः किं श्रूयंते ॥ एयमट्ठं निसामित्ता हेऊकारणचो-
इओ तओ नमी रायरिसी देविंदं इणमब्बवी ॥ ततो नमी राजर्षिः एतदर्थं देवेंद्रोक्तं श्रुत्वा हेतुः पंचावयववाक्यरूपः कारणं अन्य-
थानुपपत्तिमात्रं ताभ्यां हेतुकारणाभ्यां नोदितः प्रेरितः सन् देवेंद्रं इदं वक्ष्यमाणं वाक्यं अब्रवीत् ॥ मिहिलाए चेइए वच्छे सीयच्छा-
ए मणोरमे पत्तपुप्फफलोवेए बहूणं बहुगुणे सया ॥ वाएण हीरमाणंमि चेइयंमि मणोरमे दुहिया असरणा अत्ता एए कंदंति भो ख-
गा ॥१०॥ लोकोऽनुमिथिलायां चैत्यवृक्षे उद्याने ... मनोरमे ... उद्याने पक्षिणो दुःखिताः दुःखप्राप्ताः असरणाः त्राणरहिताः अ-
थवा आर्ता पीडिताः संतः क्रंदंति आक्रंदं कुर्वंति किं० मनोरमे चैत्ये शीतच्छाये शीतलच्छायायुक्ते पुनः किं० वातेन ह्रियमाणे इतस्ततः क्षि-
प्यमाणे यतः खगाः आक्रंदं कुर्वंति ॥ एयमट्ठं निसामित्ता हेऊकारणचोइओ तओ नमिं रायरिसिं देविंदो इणमब्बवी ॥११॥
ततो देवेंद्रः एतदर्थं निशम्य श्रुत्वा हेतुकारणनोदितः प्रेरितः सन् तं नमिराजर्षिं प्रति इदं अब्रवीत् ॥१२॥ ... ॥ एस अग्गी
य वाऊ य एयं डज्झइ मंदिरं भयवं अंतेउरं तेणं कीस णं नावपिक्खह ॥१२॥ हे भगवन् एष प्रत्यक्षो अग्निर्वायुश्च ... तत्त्वमंदिरं
दह्यते ... अंतःपुरं ... तस्मात् कस्मात् न अवलोकयसि ॥१३॥ एयमट्ठं निसामित्ता हेऊकारणचोइओ तओ नमी
रायरिसी देविंदं इणमब्बवी ॥१४॥ ततो नमिः राजर्षिः तदर्थं निशम्य श्रुत्वा हेतुकारणप्रेरितः सन् देवेंद्रं इदं वाक्यमब्रवीत् ॥१४॥ सुहं वसामो जीवा-
मो जेसिं मो नत्थि किंचण मिहिलाए डज्झमाणीए न मे डज्झइ किंचण ॥१५॥ तेऽहं सुखं यथा स्यात् तथा वसामः तिष्ठामः सुखं जीवामः प्रा-
णान् धारयामः येषां नोऽस्माकं किंचन स्तोकमपि वस्तु नास्ति मिथिलायां दह्यमानायां मम किंचनापि न दह्यते ॥१६॥ चत्तपुत्तक-
लत्तस्स निव्वावारस्स भिक्खुणो पियं न विज्जई किंचि अप्पियं पि न विज्जई ॥१५॥ भिक्षोः किंचित् प्रियं न विद्यते अप्रियमपि
अनिष्टमपि न विद्यते किं० भिक्षोः त्यक्तपुत्रकलत्रस्य पुनः किं० निर्व्यापारस्य कृष्यादिव्यापाररहितस्य ॥१६॥ बहुं खु मुणिणो भद्दं अण-
गारस्स भिक्खुणो सव्वओ विप्पमुक्कस्स एगंतमणुपस्सओ ॥१६॥ खलु निश्चयेन मुनेः बहु भद्रं श्रेयः किं० मुनेः अनगारस्य पुनः किं० सर्वतो बा-
ह्याभ्यंतरपरिग्रहात् विप्रमुक्तस्य ... पुनः किं० एकांतं अनुपश्यतः ... ॥१६॥ एयमट्ठं निसामित्ता हेऊकारणचोइओ तओ नमिं रायरिसिं देविंदो इण-
मब्बवी ॥ ततो देवेंद्रः एतदर्थं निशम्य हेतुकारणनोदितो नमिराजर्षिं इदं अब्रवीत् ॥१७॥ ... ॥ पागारं कारइ-
त्ताणं गोपुरट्टालगाणि य उस्सूलगसयग्घीओ तओ गच्छसि खत्तिया ॥१८॥ हे क्षत्रिय प्राकारं दुर्गं कारयित्वा पुनः गोपुराणि प्रतोलीद्वा- १७

राणि अट्टालकानि प्राकारकोष्ठकोपरिवर्तीनि स्थानानि उत्सूलकाः खातिकाः परबलपातार्थं ... शतघ्नीः यंत्रविशेषान् कारयि-
त्वा ततः पश्चात् गच्छ ॥१८॥ एयमट्ठं निसामित्ता हेऊकारणचोइओ तओ नमी रायरिसी देविंदं इणमब्बवी ॥१९॥ ततो नमी राजर्षिः एतदर्थं निशम्य हेतुकारणनोदितो देवेंद्रं इद-
मब्रवीत् ॥२०॥ सद्धं नगरं किच्चा तवसंवरमग्गलं खंती निउणपागारं तिगुत्तं दुप्पधंसयं ॥२०॥ धणुं परक्कमं किच्चा जीवं च इरियं सया धि-
इं च केयणं किच्चा सच्चेण पलिमंथए ॥२१॥ तवनारायजुत्तेण भित्तूणं कम्मकंचुयं मुणी विगयसंगामो भवाओ परिमुच्चई ॥२२॥ मुनिर्विगतसंग्रामः
सन् भवात् संसारात् परिमुच्यते किं कृत्वा श्रद्धां तत्त्वरुचिरूपां नगरं कृत्वा तपःसंवरं कपाटार्गलां तपो द्वादशधा संवरः आश्रवनिरोधः तं मिथ्यात्वा-
दिदुष्टनिवारकत्वेन कपाटार्गलां कृत्वा तथा क्षमां निपुणं रम्यं प्राकारं कृत्वा किं० त्रिगुप्तं अट्टालकमूलकखातकशतघ्नीस्थानीयाभिः मनोगु-
प्त्यादिभिः गुप्तं पुनः किं० दुष्प्रधर्षं परैरजय्यं ॥२२॥ पुनः किं कृत्वा पराक्रमं जीववीर्योल्लासं धनुः कोदंडं कृत्वा पुनः किं० ईर्यासमितिं जीवां
प्रत्यंचां कृत्वा पुनः किं० धृतिं केतनं कृत्वा ... सत्येन ... पलिमंथयेत् बध्नीयात् ॥२२॥ पुनः किं० तपोनाराचयुक्तेन
... कर्मकंचुकं भित्त्वा ॥२२॥ एयमट्ठं निसामित्ता हेऊकारणचोइओ तओ नमिं रायरिसिं देविंदो इणमब्बवी ॥२३॥ ततो देवेंद्रः एतदर्थं निशम्य हेतुका-
रणनोदितो नमिराजर्षिं इदं अब्रवीत् ॥२३॥ ... ॥ पासाए कारइत्ताणं वद्धमाणगिहाणि य वालग्गपोइयाओ
य तओ गच्छसि खत्तिया ॥२४॥ हे क्षत्रिय प्रासादान् कारयित्वा ... वर्धमानगृहाणि अनेकवास्तुविद्योक्तानि कारयित्वा वालग्र-
पोतिकाः ... क्रीडास्थानानि कारयित्वा ततः पश्चात् गच्छ ॥२४॥ एयमट्ठं निसामित्ता हेऊकारणचोइओ तओ नमी रायरिसी देविंदं इणमब्बवी ॥२५॥ ततो नमिरा-
जर्षिः एतदर्थं निशम्य हेतुकारणनोदितः देवेंद्रं इदं अब्रवीत् ॥२५॥ संसयं खलु सो कुणई जो मग्गे कुणई घरं जत्थेव गंतुमिच्छेज्जा तत्थ
कुव्वेज्ज सासयं ॥२६॥ यः पुमान् मार्गे गृहं कुरुते स खलु निश्चितं संशयं संदेहं स्थितं कुरुते कदाचिन्मम मनसः ... कदाचिन्न ... यत्र
एव गंतुं इच्छेत् तत्रैव शाश्वतं मोक्षरूपं गृहं कुरुते ॥२६॥ एयमट्ठं निसामित्ता हेऊकारणचोइओ तओ नमिं रायरिसिं देविंदो इणमब्बवी ॥२७॥ ततो देवेंद्रः एतदर्थं निशम्य
हेतुकारणनोदितो नमिराजर्षिं इदं अब्रवीत् ॥२७॥ आमोसे लोमहारे य गंठिभेए य तक्करे नगरस्स खेमं काऊणं तओ गच्छसि खत्ति-
या ॥२८॥ हे क्षत्रिय आमोषान् मुष्णंति ... लोमहारिणः प्राणान् हृत्वा सर्वस्वं हरंति तान् ग्रंथिभेदान् ग्रंथि-
छेदकान् तस्करान् चौरान् निवार्य नगरस्य क्षेमं कृत्वा ततो गच्छ ॥२८॥ एयमट्ठं निसामित्ता हेऊकारणचोइओ तओ नमी रायरिसी देविंदं इणमब्बवी ॥२९॥ ततो नमिरा-
जर्षिः एतदर्थं निशम्य हेतुकारणनोदितो देवेंद्रं इदं अब्रवीत् ॥२९॥ असइं तु मणुस्सेहिं मिच्छादंडो पउंजई अकारिणोऽत्थ बज्झंति मुच्चई

उत्तराध्ययनदीप
१८

कारं ज्ञणे ॥२०॥ उ वार्थमनुष्येः अमहन् दुःखेन कष्टात् प्रियाद्येन प्राः स्त्रीकादेर्मोदेशात्यागादि दृश्यते इत्युक्तत्वं अत्र लोके केचित्तस्कारिणः चौर्य
क्रियाकारकत्वादिकं ममेति अमी कारकेषु विद्यतश्चौर्यं कर्वतां सत्यमुच्यते ततो रत्नत्रयावद्धसंलाववधोरारक्तौ ॥२८॥ एतमर्थं निशम्य हेउकारणचोइओ तओ नमिं
राय देविंदो ॥ ३१॥ ततो देवेन्द्रो हेतुकारणाभ्यां नोदितो नमिं राजर्षिमिदं अब्रवीत् ॥३१॥ जे केइ पत्थिवा तुब्भं नाणमंति नराहिवा
... वसे ते ठावइत्ताणं तओ गच्छसि खत्तिया ॥३२॥ हे नराधिप ये केचित् पार्थिवाः नृपाः तव नम्राः न नमन्ति ननमस्कुर्वन्ति हे क्षत्रिय वशे
... नृपान् स्थापयित्वा गमेत्गच्छ ॥३३॥ एयमट्ठं निसामित्ता हेउकारणचोइओ तओ नमी रायरिसी देविंदं इणमब्बवी ॥३४॥ ततो नमिराजर्षिः एतदर्थं श्रुत्वा हेतुकारणप्रेरि
तो देवेन्द्रं इदं अब्रवीत् ॥३३॥ जो सहस्सं सहस्साणं संगामे दुज्जए जिणे एगं जिणेज्ज अप्पाणं एस से परमो जओ ॥३४॥ यः पुमान् सुभटानां
सहस्राणां सहस्रं दशलक्षं दुर्जये संग्रामे जयेत् किंवा एकं सहस्रं दुर्जयं जयेत् सहस्रं दुर्जयं यः पुमान् एकं आत्मानं जयेत् तेन तस्य एष दशलक्षसुभट
जयात् परमो जयः ॥३४॥ अप्पाणमेव जुज्झाहि किं ते जुज्झेण बज्झओ ॥ अप्पाणमेव अप्पाणं जइत्ता सुहमेहए ॥३५॥ आत्मनैव सह
युध्यस्व तेन बाह्ययुद्धेन किं आत्मनैव आत्मानं जित्वा सुखं ... तेषां प्राप्नोति ॥३५॥ पंचिंदियाणि कोहं माणं मायं तहेव लोहं च दु
ज्जयं चेव अप्पाणं सव्वमप्पे जिए जियं ॥३६॥ पंचेंद्रियाणि क्रोध मानो मायां लोभं च आत्मा मनश्च दुर्जयो दुर्जयमतः
... आत्मनि जीते जिते सर्वं जितं ॥३६॥ ... ॥ एयमट्ठं निसामित्ता हेउकारणचोइओ तओ नमिं रायरिसिं देविंदो ॥३७॥ ततो देवेन्द्र एतदर्थं
निशम्य हेतुकारणप्रेरितो नमिं राजर्षिं इदं अब्रवीत् ॥३७॥ जइत्ता विउले जन्ने भोइत्ता समणमाहणे दत्ता भोच्चा य जट्ठा य तओ गच्छ
॥३८॥ हे क्षत्रिय विपुलान् यज्ञान् यजनानि कृत्वा श्रमणब्राह्मणान् भोजयित्वा ब्राह्मणेभ्यो गोसहस्रादि दत्वा स्वयं भोगादीन् भुक्त्वा
स्वयं यागान् कृत्वा च पश्चात् ततो गच्छ ॥३८॥ एयमट्ठं निसामित्ता हेउकारणचोइओ तओ नमी रायरिसी देविंदं इणमब्बवी ॥३९॥ ततो नमिराजर्षिः एतदर्थं श्रुत्वा हेतुकारणप्रेरितो
देवेन्द्रमिदमब्रवीत् ॥३९॥ जो सहस्सं सहस्साणं मासे मासे गवं दए तस्सावि संजमो सेओ अदिंतस्स वि किंचणं ॥४०॥ यः पुमान् गवां सहस्र
सहस्राणां मासे मासे दद्यात् दत्तेन तस्य एवंविधदानदातुरपि यदि कश्चित् संयमः स्यात् तदा स एव संयमः श्रेयान् श्रेष्ठः स्यात् किंभूतस्य किंचन स्वल्प
मपि अददतः ॥४०॥ एयमट्ठं निसामित्ता हेउकारणचोइओ तओ नमिं रायरिसिं देविंदो ॥४१॥ ततो देवेन्द्रः एतदर्थं श्रुत्वा हेतुकारणप्रेरितो नमिं राजर्षिं इदमब्रवीत्
॥४१॥ घोरासमं चइत्ताणं अन्नं पत्थेसि आसमं इहेव पोसहरओ भवाहि मणुयाहिवा ॥४२॥ हे मनुजाधिप घोराश्रमं
गृहस्थाश्रमं त्यक्त्वा अन्यं आश्रमं संयमरूपं प्रार्थयसे अतः इहैव गृहाश्रमे हि तिष्ठ तं पोषधरतो भव अष्टम्यादिषु

१८

पर्वसु पोषधं कुरु ॥४२॥ एयमट्ठं निसामित्ता हेउकारणचोइओ तओ नमी रायरिसी देविंदं ... ॥४३॥ ततो नमिराजर्षिः एतदर्थं निशम्य श्रुत्वा हेतुकारणप्रेरितो देवेंद्रं इदमब्रवी
त् ॥४३॥ मासे मासे उ जो बालो कुसग्गेणं तु भुंजए न सो सुयक्खायधम्मस्स कलं अग्घइ सोलसिं ॥४४॥ यो बालो विवेकहीनो मासे मासे कुशाग्रे
ण भुंक्ते एतावता कष्टाद्यनुष्ठानेन धर्मं करोति स कष्टकर्ता स्वाख्यातधर्मस्य जिनधर्मस्य षोडशीं कलां नार्हति षोडशांशे समं नार्घति नार्हति
निरवद्यत्वात् ॥४४॥ एयमट्ठं निसामित्ता हेउकारणचोइओ तओ नमिं रायरिसिं देविंदो ॥४५॥ ततो देवेन्द्रः एतदर्थं निशम्य हेतुकारणप्रेरितो नमिं राजर्षिं इदमब्रवी
त् ॥४५॥ ... ॥ हिरण्णं सुवण्णं मणिमुत्तं कंसं दूसं च वाहणं कोसं च वड्ढावइत्ताणं तओ गच्छसि खत्तिया ॥४६॥ हे क्षत्रिय
हिरण्यं रूप्यं सुवर्णं मणिमुक्ताफलं कांस्यं कांस्यभाजनादि दूष्यं वस्त्रादि वाहनं रथादि वाहनं घोटकादिः कोशं भांडा
रं वर्धयित्वा वृद्धिं नीत्वा ततो गच्छ ॥४६॥ एयमट्ठं निसामित्ता हेउकारणचोइओ तओ नमी रायरिसी देविंदं ॥४७॥ ततो नमिराजर्षिः एतदर्थं निशम्य हेतुकारणप्रेरितो
देवेंद्रमिदं अब्रवीत् ॥४७॥ सुवण्णरुप्पस्स उ पव्वया भवे सिया हु केलाससमा असंखया नरस्स लुद्धस्स न तेहिं किंचि इच्छा हु आगाससमा अणंतिया ॥४८॥ स्यात् कदाचित् कैलाससमा असंख्याः पर्वताः सु
वर्णरूप्यस्य भवेयुः तथापि लुब्धस्य नरस्य तैः किं लोभिनः ... यस्मात् इच्छा आकाश
समा अनंतिका अंतरहिता स्यात् ॥४८॥ पुढवी साली जवा चेव हिरण्णं पसुभिस्सह पडिपुण्णं नालमेगस्स इइ विज्जा तवं चरे ॥४९॥
एकस्य जीवस्य ... यवाः चकारात् ... धान्यसंचयः एवाः स्वधारणार्थं हिरण्यं स्वर्णादयः पशुभिः गवादि
भिः सह ... इत्यस्मात् ... विद्वान् तपः चरेत् आसेवेत ॥४९॥ ... ॥५०॥ एय
मट्ठं निसामित्ता हेउकारणचोइओ तओ नमिं रायरिसिं देविंदो ॥५०॥ ततो देवेंद्रः एतदर्थं निशम्य हेतुकारणप्रेरितो नमिं राजर्षिं इदमब्रवीत् ॥५०॥ अच्छेरगमब्भुदए भोए
चयसि पत्थिवा असंते कामे पत्थेसि संकप्पेण विहम्मसि ॥५१॥ हे पार्थिव आश्चर्यरूपान् अद्भुतकान् ... भोगान् त्यजसि
असतः अविद्यमानान् कामान् प्रार्थयसे यत् चकारात् तव ... संकल्पेन ... विहन्यसे विविधं बाध्यसे ॥५१॥
एयमट्ठं निसामित्ता हेउकारणचोइओ तओ नमी रायरिसी देविंदं ॥५२॥ ततो नमिराजर्षिः एतदर्थं निशम्य हेतुकारणप्रेरितो देवेंद्रं इदं अब्रवीत् ॥५२॥ सल्लं
कामा विसं कामा कामा आसीविसोवमा कामे पत्थेमाणा अकामा जंति दुग्गइं ॥५३॥ हे ब्राह्मण ... कामाः
शल्यं कामाः ... विषमिव विषं कामाः कामा आशीविषोपमाः दृष्टिविषसर्पोपमाः ... कामान्

उत्त०वृत्ति
१९

धिय्यमानाः अपिअक्काशा असेव्यमाना अपिइट्ठेतिनरकादियांति गच्छंति ॥ अहे वयइ कोहेणं माणेणं अहमा गई मायागई पडि
घाई लोभाओ दुहओ भयं ॥ जीवः क्रोधेनाधो नरकादिकं गतिं गच्छति जीवो मानेन गर्वेण अधमा गतिर्नीचा गतिः स्यात् जीवानां
मायया गतेर्नृगतेः प्रतिघातो विनाशः स्यात् लोभात् लुब्धत्वात् इहलोके परलोके च भयं दुःखं स्यात् कामभोगाः निःक्रोधमदा अववर्ज्य
वंतयवल्लभोऽयंति ॥ ५४ ॥ अवउज्झिऊण माहणरूवं विउव्विऊण इंदत्तं वंदइ अभित्थुणंतो इमाहिं
महुराहिं वग्गूहिं ॥ ५५ ॥ इंद्रो ब्राह्मणरूपं अपोह्य त्यक्त्वा इंद्रत्वं विकृत्य इंद्ररूपं कृत्वा आभिर्मधुराभिः श्रुतिसुखाभिर्वाग्भिर्वचनैः
अभिष्टुवन् स्तुतिं कुर्वन् नमिं वंदते नमस्करोति ॥ ५६ ॥ अहो ते निज्जिओ कोहो अहो माणो पराजिओ अहो ते निरक्किया माया अहो
लोहो वसीकओ ॥ ५७ ॥ अहो इत्याश्चर्ये त्वया क्रोधो निर्जितः यतः इंद्रोपनमनदिने तेऽपि न कंपितः अहो त्वया [illegible] य
मानोऽपि पराजितः यदि इंद्रो नेक्षिते देवे न पतितः अहो त्वया मायापि निराकृता अपास्ता यस्त्वं पुरंदरादिदेवेन न पतितः
अहो त्वया लोभो वशीकृतः यस्त्वं सुरनृपादिदेवेन न पतितः ॥ अहो ते अज्जवं साहु अहो ते साहु मद्दवं अहो ते उत्तमा
खंती अहो ते मुत्ति उत्तमा ॥ ५८ ॥ अहो ते तव आर्जवं सरलत्वं मा धु शोभनं अहो ते तव मार्दवं सुकोमलत्वं साधु शोभनं अहो
ते तव क्षमा उत्तमा प्रधाना अहो ते तव मुक्तिर्निर्लोभता उत्तमा श्रे ष्ठा ॥ इहं सि उत्तमो भंते पच्छा होहिसि उत्तमो लोगुत्तमो उ
त्तमं ठाणं सिद्धिं गच्छसि नीरओ ॥ ६० ॥ हे भगवन् इह जन्मनि गुण रचिततया त्वं उत्तमोऽसि अथ पश्चात् परलोके उत्तमः श्रेष्ठो भवि
ष्यसि हे भगवन् त्वं नीरजाः कर्मरहितः सन् लोकोत्तमं लोकमध्ये प्रधानं श्रेष्ठं स्थानं सिद्धिं गच्छसि ॥ ६१ ॥ एवं अभित्थुणंतो रायरिसिं
उत्तमाए सिद्धाए पयाहिणं करेंतो पुणो पुणो वंदई सक्को ॥ ६२ ॥ शक्रः इंद्रः एवं पूर्वोक्तरीत्या राजर्षिं नमिं उत्तमया श्रेष्ठया श्रद्धया लक्ष्या
अभिष्टुवन् स्तुतिं कुर्वन् वा प्रदक्षिणां कुर्वन् पुनः वारं वंदते ॥ ६३ ॥ तो वंदिऊण पाए चक्कंकुसलक्खणे मुणिवरस्स आगासेणु
प्पइओ ललियचवलकुंडलकिरीडी ॥ ६४ ॥ ततो ललितचपलकुंडलकिरीटी ललितचपले विलासवन्त्या चपले कुंडले चंचले कुंडले यस्य स तथा
सो किरीटी ललितचपलकुंडलकिरीटीमुकुटवान् शक्र इंद्रो मुनिवरस्य चक्रांकुशलक्षणौ चक्रांकुशाभ्यां अंकितौ पादौ वंदित्वा आका
शेनोत्पतितः स्वर्गाभिमुखं गतः ॥ ६५ ॥ नमी नमेइ अप्पाणं सक्खं सक्केण चोइओ चइऊण गेहं विदेही सामण्णे पज्जुवट्ठिओ ॥ ६६ ॥ न
मिरात्मानं नमयति नम्रं करोति तत्त्वज्ञः सन् नमयति विदेही विदेहदेशाधिपः साक्षात् शक्रेण इंद्रेण प्रेरितः सन् गेहं त्यक्त्वा श्रामण्ये चा १९

रित्रे पर्युपस्थितः उद्यतो भवत् ॥ ६७ ॥ एवं करेंति संबुद्धा पंडिया पवियक्खणा विणियट्टंति भोगेसु जहा से नमी रायरिसी त्तिबेमि ॥
संबुद्धाः ज्ञानवन्तः एवं अमुना प्रकारेण कुर्वंति किंभूताः संबुद्धाः पंडिताः सुनिश्चितशास्त्रार्थाः पुनः किंभूताः विचक्षणाः अति निपुणाः य
थं नमिराजर्षिः वर्तितवान् यथा समनमिराजर्षिः ॥ [illegible]
[illegible] दुमपत्तए पंडुयए जहा निवडइ राइगणाण अच्चए एवं मणुया
ण जीवियं समयं गोयम मा पमायए ॥ १ ॥ यथा पांडुकं पत्रं द्रुमपत्रं रात्रिगणानां अहोरात्रिसमूहानां अत्यये अतिक्रमे निपतति द्रुमात् पृथक्
भवति एवं अमुना प्रकारेण मनुष्याणां जीवितं आयुः रात्रिगणानां अत्यये अतिक्रमे पश्चात् निःशेषं पतति प्रकारेण जीवदेहो न स्यात् पतति
हे गौतम गौतमगोत्रसमुद्भव इंद्रभूते समयमपि सूक्ष्मकालमपि मा प्रमादी प्रमादं मा कुरु ॥ ३ ॥ कुसग्गे जह ओसबिंदुए थोवं चिट्ठइ ल
ंबमाणए एवं मणुयाण जीवियं समयं गोयम मा पमायए ॥ ३ ॥ यथा कुशाग्रे दर्भाग्रे अवश्यायः शरत्कालजातो जलकणः स्तोकं विंदुकः
स्तोककालं तिष्ठति लंबमानः विंदुकः स्तोककालं स्तोकमात्रं पातयति लंबमानः पतति ईषत् ति ष्ठ तत् एवं प्रकारं मनुजानां नराणां जीवितं आयुः अतो हे गौतम
समयमपि मा प्रमादी प्रमादं मा कुरु ॥ ३ ॥ इइ इत्तरियम्मि आउए जी वि यम्मि बहुपच्चवायए विहुणाहि रयं पुरे कडं समयं गोयम
इत्थं अमुना प्रकारेण इत्वरे स्वल्पकाले आविनि आयुषि बहुप्रत्यपाये बहवः अध्यवसायादि उपघातसहिते सोपक्रमे जीविते न के
अपि तिष्ठति प्रमादं त्यज्य रजः कर्मविधुनीहि पृथक् कुरु सनातनं वाणी हे गौतम समयमपि प्रमादं मा कुरु ॥ ३ ॥ दुल्लहे खलु माणुसे भवे
चिरकालेण वि सव्वपाणिणं गाढा य विवाग कम्मुणो समयं गोयम ॥ ४ ॥ सर्वेषां प्राणिनां चिरकालेनापि बहुकालेनापि खलु निश्चितं हे गौतम
मनुष्यभवो नरभवो दुर्लभो वर्तते कर्मणां नृपतिविघातिकर्मप्रकृतीनां विपाकाः उदयाः गाढाः स्फटयितुमशक्याः न नाशयितुं शक्याः अतो हे गौतम
समयमपि प्रमादं मा कुरु ॥ ५ ॥ पुढवीकायमइगओ उक्कोसं जीवो उ संवसे कालं संखाईयं समयं गोयम ॥ ५ ॥ जीवः पृथ्वीकायं अतिगत
ः प्राप्तः सन् उत्कृष्टं उत्कर्षतः बहुकालं असंख्यातीतं कालं असंख्याता उत्सर्पिण्यवसर्पिणीमानं संवसेत् तिष्ठेत् अतो हे गौतम समयमपि
मा प्रमादीः ॥ ५ ॥ आउक्कायमइगओ उक्कोसं जीवो उ संवसे कालं संखाईयं समयं ॥ ६ ॥ जीवो अप्कायं जलकायं अतिगतः प्राप्तः
सन् उत्कृष्टं उत्कर्षतः संख्यातीतं असंख्यं कालं संवसेत् ततो हे गौतम समयमपि मा प्रमादीः ॥ ६ ॥ तेउक्कायमइगओ उक्कोसं जीवो उ
संवसे कालं संखाईयं समयं ॥ ७ ॥ उत्कृष्टो जीवः तेजःकायं अतिगतः प्राप्तः सन् उत्कर्षतः संख्यातीतं असंख्यं कालं संवसेत् तत्

MEMORIAL
[illegible]

उत्तपदीप
२७

नोहे गौतम समयमपि मा प्रमादीः ||७|| वाउक्कायमइगओ उक्कोसं जीवो उ संवसे कालं संखाईयं समयं ||८|| जीवो वायुकाये अतिग
तः प्राप्तः सन् उत्कर्षतः संख्यातीतं असंख्यं कालं संवसेत् तेन तो हे गौतम समयमपि मा प्र मादीः ||८|| वणस्सइकायमइगओ उक्कोसं जी
वो उ संवसे कालमणंतदुरंतं समयं ||९|| जीवो वनस्पतिकायमतिगतः सन् उत्कर्षतो दुरंतं अनंतं कालं अनंतरं अनंतो त्पत्तिरूपमि
तं कालं संवसेत् ततो हे गौतम समयमपि मा प्रमादी ||९|| बेइंदियकायमइगओ उक्कोसं जीवो उ संवसे कालं संखिज्जसन्नियं समयं ||
||१०|| जीवो द्वींद्रियकायमतिगतः प्राप्तः सन् उत्कर्षतः संख्येयसंज्ञितं संख्यातवर्षसहस्रात्मकं कालं संवसेत् ततो हे गौतम समयमपि
मा प्रमादी ||१०|| तेइंदियकायमइगओ उक्कोसं जीवो उ संवसे कालं संखिज्जसन्नियं समयं ||११|| जीवः त्रींद्रियकायमतिगतः प्राप्तः
सन् उत्कर्षतः संख्येयसंज्ञितं कालं संवसेत् ततो हे गौतम समयमपि मा प्रमादीः ||११|| चउरिंदियकायमइगओ उक्कोसं जीवो उ संव
से कालं संखिज्जसन्नियं समयं ||१२|| जीवः चतुरिंद्रियकायम तिगतः प्राप्तः सन् उत्कर्षतः संख्येयसंज्ञितं कालं संवसेत् ततो हे गौ
तम समयमपि मा प्रमादीः ||१२|| पंचिंदियकायमइगओ उक्को सं जीवो उ संवसे सत्तट्ठभवग्गहणे समयं ||१३|| अत्र पंचेंद्रि
यशब्देन तिर्यग्योनिकाः जीवाः पंचेंद्रियमतिगताः उत्कर्षतः सप्त अष्ट भवग्रहणानि संवसेत् ततो हे गौतम समयमपि मा प्रमादी
||१४|| देवे नेरइए य अइगओ उक्कोसं जीवो उ संवसे इक्किक्कभव ग्गहणे समयं ||१४|| जीवो देवान् नैरयिकांश्च अतिगतः प्राप्तः उ
त्कर्षतः एवं एकैकभवग्रहणं त्रिंशत्सागरोपमानि संवसेत् ततो हे गौतम समयमपि मा प्रमादीः ||१४|| एवं भवसंसारे संसरइ सु
हासुहेहिं कम्मेहिं जीवो पमायबहुलो समयं ||१५|| एवं अमुना प्रकारेण बहुलः प्रमादाश्रितो जीवः शुभाशुभैः कर्मभिः
कृत्वा भवसंसारे इह मनुष्यादि कायस्थितिलक्षणे तिर्यगादिरूपे संसरति भ्रमति ततो हे गौतम
समयमपि मा प्रमादीः ||१५|| लद्धूण वि माणुसत्तणं आयरियत्तं पुणरवि दुल्लहं बहवे दसुया मिलक्खुया समयं ||१६|| मानुष
त्वं लब्ध्वापि पुनरपि आर्यत्वं मगधाद्यार्यदेशोत्पत्तिरूपं दुर्लभं यतो बहवो दस्यवः म्लेच्छाः चौराः कयवनदेशोद्भवा नरा
आर्यदेशोत्पन्नाः तस्मात् हे गौतम समयमपि मा प्रमादीः ||१६|| लद्धूण वि आरियत्तणं अहीणपंचेंदियया हु दुल्लहा विगलिंदि
यया हु दीसई समयं ||१७|| आर्यत्वं आर्यदेशे लब्ध्वापि जन्मनि अहीनपंचेंद्रियता संपूर्णपंचेंद्रियता दुर्लभा जन्मनि विकल
इंद्रियविकलेंद्रियता रोगाद्युपघातेन दृश्यते ततो हे गौतम समयमपि मा प्रमादीः ||१७|| अहीणपंचेंदियत्तं पि से लहे उत्तमधम्म

लुप्तपृष्ठलेखनम्

म्मसुई हु दुल्लहा कुतित्थिनिसेवए जणे समयं ||१८|| स जीवो हीनपंचेंद्रियत्वमपि लभते तथापि उत्तमधर्मश्रुतिर्दुर्ल
भा यतः कुतीर्थिनिषेवकः कुतीर्थमिथ्यात्वनिषेवी जनो लोको दृश्यते ततो हे गौतम समयमपि मा प्रमादीः ||१८|| लद्धूणवि
उत्तमं सुइं सद्दहणा पुणरावि दुल्लहा मिच्छत्तनिसेवए जणे समयं ||१९|| उत्तमां श्रुतिं जिनधर्मश्रवणं लब्ध्वापि पुनरपि श्रद्धानं
रुचिरूपं दुर्लभं यतो अनादिनवाभ्यस्ततया मिथ्यात्वनिषेवको मिथ्यात्वसेवी जनो लोकः स्यात् ततो हे गौतम समयमपि मा प्रमादीः
||२०|| धम्मं पि हु सद्दहंतया दुल्लहया काएण फासया इह कामगुणेहिं मुच्छिया समयं ||२०|| कदाचित् कोऽपि धर्मं जिनधर्ममपि श्रद्द
धानः कश्चिन्मिथ्यात्वपि जीवस्य कायेन स्पर्शकाः दुर्लभाः यतः इह विश्वे जीवाः कामगुणेषु शब्दादिषु मूर्छिताः लोलुपाः संति ततो हे गौतम समयम
पि मा प्रमादीः ||२०|| परिजूरइ ते सरीरयं केसा पंडुरया हवंति ते से सोयबले य हायई समयं ||२१|| हे गौतम तेन तव शरीरं परिजीर्य
ति वयोहानितः सन् तव केशाः श्यामा अपि पांडुरकाः श्वेता भवंति तत्तथा श्रोत्रबलं कर्णयोः श्रवणबलं हीयते यस्माद्धि कर्णबलं समासीनं स्तोकं
ततो हे गौतम समयमपि मा प्रमादीः ||२१|| परिजूरइ ते सरीरयं केसा पंडुरया हवंति ते से चक्खुबले य हायई समयं ||२२|| हे गौतम तेन तव शरीरं परिजीर्य
ति तव केशाः पांडुरकाः भवंति तत् चक्षुर्बलं हीयते ततो हे गौतम समयमपि मा प्रमादीः ||२२|| परिजूरइ ते सरीरयं केसा पंडुरया हवं
ति ते से घाणबले य हायई समयं ||२३|| तेन तव शरीरं परिजीर्यति तेन तव केशाः पांडु र काः भवंति तव घ्राणबलं नासिकाबलं गंधग्रहणसमर्थं हीयते तत
तो हे गौतम समयमपि मा प्रमादीः ||२३|| परिजूरइ ते सरीरयं केसा पंडुरया हवंति ते से जिब्भबले य हायई समयं ||२४|| तेन तव शरीरं परिजीर्यति तेन तव केशाः
पांडुरकाः भवंति तत् जिह्वाबलं हीयते ततो हे गौतम समयमपि मा प्रमादीः ||२४|| परिजूरइ ते सरीरयं केसा पंडुरया हवंति ते से फासबले य हायई समयं ||२५||
तेन तव शरीरं परिजीर्यति तेन तव केशाः पांडुरकाः भवंति तत् स्पर्शबलं हीयते ततो हे गौतम समयमपि मा प्रमादीः ||२५|| परिजूरइ ते सरीरयं केसा पं
डुरया हवंति ते से सव्वबले य हायई समयं ||२६|| तेन तव शरीरं परिजीर्यति तेन तव केशाः पांडुरकाः भवंति तत् सर्वबलं हस्तपादादि अवयवानां बलं हीयते ततो
हे गौतम समयमपि मा प्रमादीः ||२६|| अरई गंडं विसूइया आयंका विविहा फुसंति ते विहडइ विद्धंसइ ते सरीरयं समयं ||२७|| हे गौत
म तेन तव विविधाः अनेकप्रकाराः अरतिः चित्तोद्वेगः गंडः विसूचिका अजीर्णदोषः आतंकाः सद्योघातिनो रोगाः स्पृशंति तेन तव शरीरं दुर्जा
तं विशेषेण पतति विध्वस्यति जीवरहितं नव विघटति ततो हे गौतम समयमपि मा प्रमादीः ||२७|| वोच्छिंद सिणेहमप्पणो कुमुयं सारइयं व
पाणियं से सव्वसिणेहवज्जिए समयं ||२८|| हे गौतम आत्मनः स्नेहरागं व्युच्छिंधि निवारय कमिव कुमुदमिव यथा कुमुदं चंद्रविकाशि

२७

MEMORIAL

उत्तरादीप
२१

कमलं वा शारदं पानीयं शरदि भवं कुमुदं चंद्रविकासि पद्मं जलमध्यगमपि जलेन स्पृष्टं भवति तथा त्वं सिंचसि स्नेहं त्यक्त्वा ततः सर्वस्नेहवर्जितः सन् हे गौतम समय
मपि मा प्रमादीः ॥२८॥ चिच्चाण धणं च भारियं पव्वइओ हि सि अणगारियं मा वंतं पुणो वि आविए समयं ॥ हे गौतम धनं च पुनः पुत्रादि
कं त्यक्त्वा हि यस्मात्कारणात् अनगारितां साधुतां प्रव्रजितः प्राप्तोसि अतः पुनः वान्तं मा आपिबसि ततो हे गौतम समयमपि मा प्रमा
दीः ॥२९॥ अवउज्झिय मित्तबंधवं विउलं चेव धणोहसंचयं मा तं बिइयं गवेसए समयं ॥ हे गौतम मित्रबांधवं मित्रस्वजनवर्गं वि
पुलं प्रचुरं धनौघसंचयं कनकादिद्रव्यसमूहसंचयं त्यक्त्वा द्वितीयं पुनः तन्मित्रादिकं मा गवेषयेः यस्मा
त्त्रिभिः सुत्यक्तं तत्पुनः गवेषयितुं न युक्तं ततो हे गौतम समयमपि मा प्रमादीः ॥३०॥ न हु जिणे अज्ज दीसई बहुमए दीसइ मग्गदेसिए संपइ
नेयाउए पहे समयं ॥ कश्चिद्भव्यः अपि आगामिकाले जिनो नैव दृश्यते बहुमतो जनमार्गो दृश्यते मार्गदर्शी जिनो विना न दृश्यते
तं संप्रति नैयायिके पथि मोक्षमार्गे हे गौतम समयमपि मा प्रमादीः ॥३१॥ न हु ... नेव जिनो ह्यस्मिन् काले दृश्यते अद्य अपि तिर्यग्गत्यादि
प्रत्येकमपि चिं ... मोक्षाय अनर्ज्ञानदर्शनचारित्रात्मको मुक्ति मार्गो दृश्यते यः सम्यग्दर्शनादिरूपो मार्गः जिनाभाव इति
युक्ते दर्शितो जिनैः कथितो मार्गो दर्शितो नाम सांप्रतं प्राप्तोसि ति हि मोक्षस्य प्राप्तस्य उपदिष्टस्तु मार्गो दृश्यते न च एवं विधेस्य मनोऽपि
चार्थदर्शिनं जिनं विना संतमनीत्यसंदिग्धचेतसो नाचिनोषि सत्यान ... प्रमादं विधास्यसि अतः सांप्रतं समयमपि मा प्रमा यावज्जीवं नैयायिके
जिनोक्ते मुक्तिमार्गे जिनाभावेपि केवलज्ञानिनां स्थापना निधाने ... मा प्रमादीः ॥३१॥ अवसोहिय कंटगापहं ओइन्नोसि पहं महालयं
गच्छसि मग्गं विसोहिया समयं ॥ हे गौतम कंटकपथं वरकादिमार्गं अवशोध्य परिहृत्य त्वं महालयं महान्तं मुक्तिमार्गं अवतीर्णोसि
विशोधितं मार्गं अवशोध्य विनिश्चित्य गच्छसि ततो हे गौतम समयमपि मा प्रमादीः ॥३२॥ अबले जह भारवाहए मा मग्गे विसमे वगाहि
या पच्छा पच्छाणुतावए समयं ॥ यथा अबलो निर्बलो बलहीनो भारवाहकः विषमं दुर्गममार्गं अवगाह्य ... विमुच्य कांगी कलनाद्यः
पश्चात् पश्चात्तापकः पश्चात्तापकर्त्ता भवति ... कश्चित् वणिग्वणिजो बहुधनस्वर्णादि ... तत्त्वगणयन् ...
आदिकं कष्टमार्गे भारेण क्लांतः सन् स्वर्णादि त्यक्त्वा गृहमागतो निर्धनतया दुःखं प्राप्नोति किं मया व्यर्थं त्यक्तं स्वर्णादि एवं त्वमपि प्रमादं त्यक्त्वा
कं संयममार्गं सन् त्वं विषमे मा भूः ततो हे गौतम समयमपि मा प्रमादीः ॥३३॥ तिण्णो हु सि अण्णवं महं किं पुण चिट्ठसि तीरमागओ अभि
तुर पारं गमित्तए समयं ॥ हे गौतम महान्तं अर्णवं संसारसागरं तीर्णोसि तीरं पारं आगतो जनः किं पुनः तिष्ठसि पारं गं २१

ते मुक्तिपदं गंतुं अभित्वरस्व त्वरस्व ततो हे गौतम समयमपि मा प्रमादीः ॥३४॥ अकलेवरसेणिमूसिया सिद्धिं गोयम लोयं गच्छसि खेमं
च सिवं अणुत्तरं समयं ॥ हे गौतम अकलेवराः सिद्धाः तेषां श्रेणिं अकलेवराः श्रेणिं क्षपकश्रेणिं उत्सृत्य ... ततो च
क्षेमं संयमरूपं ... सिद्धिं लोकस्थानं गच्छसि किं प्रति क्षेमं परचक्राद्युपद्रवहीनं पुनः किं शिवं अनुत्तरं सुखं
किं प्रधानं सर्वोत्तमं ततो हे गौतम समयमपि मा प्रमादीः ॥३५॥ बुद्धे परिनिव्वुडे चरे गामगए नगरे व संजए संतिमग्गं च बूहए समयं ॥
हे गौतम संयतः साधुः सन् ग्रामगतो ग्रामे स्थितो नगरे वा स्थितः सन् संयमं चरेः किंभूतः सन् बुद्धो ज्ञाततत्त्वः पुनः किं परिनिर्वृतः उपशमि
तकषायः तथा शांतिमार्गं दशविधधर्मं वृद्धिं नयेः ततो हे गौतम समयमपि मा प्रमादीः ॥३६॥ बुद्धस्स निसम्म भासियं सुकहियमट्ठप
ओवसोहियं रागं दोसं च छिंदिया सिद्धिंगइं गए गोयमे त्ति बेमि ॥ बुद्धस्य केवलिनो श्रीवर्धमानस्य भाषितं निशम्य श्रुत्वा रागद्वेषौ छित्वा
गौतमः सिद्धिगतिं गतः भाषितं किं भूतं सुकथितं अर्थपदैः उप शोभितं ॥ इति समाप्तं ...
... संजोगा वि
प्पमुक्कस्स अणगारस्स भिक्खुणो आयारं पाउकरिस्सामि आणुपुव्विं सुणेह मे ॥ अहं शिष्यो राजानं उचित क्रियाबहुश्रुत
पूजात्मकं प्रादुःकरिष्यामि प्रकटीकरिष्ये किं परिज्ञाः संयोगान्मातादिः कृत्वा देशादि बाह्यं अभ्यंतरसंयोगाद्विप्रमुक्तस्य पु
नः किं अनगारस्य गृहरहितस्य आनुपूर्व्या अनुक्रमेण मे मम कथ यतः शृणुत ॥१॥ जे यावि होइ निव्विज्जे थद्धे लुद्धे अणिग्गहे अभि
क्खणं उल्लवई अविणीए अबहुस्सुए ॥ स अविनीतो बहुश्रुत उच्यते यः अपि निर्विद्यो विद्यारहितः स्यात् स्तब्धः अहंकारी स्यात् यो
लुब्धो रसादिगृद्धः स्यात् यो अनिग्रहः इंद्रियसंवररहितः स्यात् यो अभीक्ष्णं उल्लपति असंबद्धं बहु भाषते ॥२॥ अह पंच
हिं ठाणेहिं जेहिं सिक्खा न लब्भई थंभा कोहा पमाएणं रोगेणालस्सएण य ॥ अथ एभिर्वक्ष्यमाणैः पंचभिः स्थानैः प्रकारैः शिक्षा ग्रह
णासेवनात्मिका न लभ्यते तान्याह स्तंभात् मानात् क्रोधात् प्रमादेन विषयादिना रोगेण आलस्येन च ॥३॥ अह अट्ठहिं ठाणेहिं सिक्खासीले त्ति वुच्चई अहस्सिरे सया दंते न य मम्ममुदाहरे ॥ अष्टभिः स्थानैः शिक्षाशी
लो बहुश्रुत उच्यते कोऽसौ अहसनशीलः सदा दांतो दमितेंद्रियः परमर्माणि न उदाहरेत् न वदेत् ॥४॥ नासीले न विसीले न
अइलोलुए अकोहणे सच्चरए सिक्खासीले त्ति वुच्चई ॥ नासीलो सीलो न चारित्रधर्माचाररहितः ॥ विशीलो विरूप

शीलः साली चारवलोलस्यात्॥ ४॥ अस्यावने लोलुपो रसलोलुपो येन इत्थं अकोधनः क्रोधरहितः सत्यरतः सत्याश्रितः इत्यमुनाष्टप्रकारेण शि-
क्षाशील उच्यते॥ ५॥ अह चोद्दसहिं ठाणेहिं वट्टमाणे उ संजए अविणीए वुच्चई सो उ निव्वाणं च न गच्छई॥ ६॥ अथ चतुर्दशसु स्थाने-
षु वर्तमानः संयतः साधुरविनीत इत्युच्यते सोऽविनीतो निर्वाणं मोक्षं न गच्छति॥ अभिक्खणं कोही हवई पबं-
धं च कुव्वई। मेत्तिज्जमाणो वमई सुयं लद्धूण मज्जई॥ ७॥ अभीक्ष्णं पुनः क्रोधी भवति प्रबंधं क्रोधस्य प्रबंधं प्रकर्षेण करोति मित्रीय-
माणोपि वमति त्यजति श्रुतं लब्ध्वा माद्यति गर्वं करोति॥ ८॥ अवि पावपरिक्खेवी अवि मित्तेसु कुप्पई। सुप्पियस्सावि मित्तस्स
रहे भासइ पावयं॥ ९॥ अपि संज्ञावने पापैः कथंचित्स्खलितादिभिः स्खलितैः परिक्षिपति तिरस्कुरुते इत्येवं शीलः पापपरिक्षेपी
अपि संज्ञावने मित्रेभ्योपि कुप्यति क्रुध्यति॥ सुप्रियस्यापि मित्रस्य अतीष्टस्यापि मित्रस्य रहस्ये कांते पापकं भाषते अगुणान् विवदति॥ पइण्ण-
वाई दुहिले थद्धे लुद्धे अणिग्गहे। असंविभागी अचियत्ते अविणीए त्ति वुच्चई॥ १०॥
प्रकीर्णवादी असंबद्धभाषी द्रोहणशीलः स्तब्धोऽहंकारी लुब्धो रसगृद्धः अनिग्रहः इन्द्रियनिग्रहरहितः॥ ११॥ अ-
संविभागी अन्यस्मै स्वल्पमपि न दत्ते अप्रीतिकरः एवंविधो विनीत इत्युच्यते॥ १२॥ अह पन्नरसहिं ठाणेहिं सुविणी-
ए त्ति वुच्चई नीयावत्ती अचवले अमाई अकुऊहले॥ १०॥ पंचदशभिः स्थानैः सुष्ठु विनीत इत्युच्यते कः नीचवर्ती
गुरुष्वनम्रवृत्तिमान् नीयं सिज्जं गइं ठाणं इत्यादि अचपलः अमाई मायारहितः अकुतूहलः नाटकादिविलोकनशीलो न॥ ११॥
अप्पं च अहिक्खिवई पबंधं च न कुव्वई। मेत्तिज्जमाणो भयई सुयं लद्धुं न मज्जई॥ १२॥ अल्पं नाधिक्षिपति नैव कंचनाधिक्षिपति
प्रबंधं क्रोधप्रबंधं न करोति मित्रीयमाणो मित्रत्वेन भजते मित्रीयितारमपि भजते श्रुतं ज्ञानमासाद्य गर्वं न करोति॥ १३॥ न
य पावपरिक्खेवी न य मित्तेसु कुप्पई। अप्पियस्सावि मित्तस्स रहे कल्लाण भासई॥ १४॥ न च पापपरिक्षेपी स्खलितो गुरोराक्षे-
पी मित्रेभ्यः कथंचिदपराधेपि न क्रुध्यति॥ अप्रियस्यापि अमित्रस्य रहसि कल्याणं भाषते॥ १५॥ कलहडमरवज्जए॥
बुद्धे अभिजाइए। हिरिमं पडिसंलीणे सुविणीए त्ति वुच्चई॥ १६॥ कलहो वाचिकः डमरः प्राणिघातादि कलहडमरवर्जकः
बुद्धिमान् अभिजातिः संयमभारनिर्वहणात् कुलीनतां गच्छति॥ ह्रीमान् लज्जासंपन्नः॥ प्रतिसंलीनो गुरुसमीपस्थायी कार्यं
विना इतस्ततो न वर्ती॥ १४॥ ^ गुरुकुले नित्यं वसेत् निष्ठं योगा नांगोपांगादीनां उपधानवान् आचाम्लादितपोविशेषवान् प्रियंकरः प्रतिकूलं नाच-

^ वसे गुरुकुले निच्चं जोगवं उवहाणवं पियंकरे पियंवाई से सिक्खं लद्धुमरहई॥ १४ ^ = १३०=

२२

रति प्रियवादी रम्यवक्ता स एवंगुणः शिक्षां लब्धुमर्हति॥ १४॥ जहा संखंमि पयं निहियं दुहओ वि विरायइ एवं बहुस्सुए भिक्खू ध-
म्मो कित्ती तहा सुयं॥ १५॥ यथा शंखे पयो दुग्धं न्यस्तं उज्ज्वलमाधुर्यतया विराजितं न चाम्लतां भजते एवं बहुश्रुते भिक्षौ धर्मः
कीर्तिः तथा श्रुतं विराजते॥ १६॥ जहा से कंबोयाणं आइन्ने कंथए सिया। आसे जवेण पवरे एवं हवइ बहुस्सुए॥ १६॥ यथा स कंबोजानां कं-
बोजदेशजातानां अश्वानां मध्ये आकीर्णः शीलादिगुणैर्व्याप्तः कंथकः प्रधानः स्यात् किं अश्वः यः वेगेन प्रवरः प्रधानः एवं ज्ञानिस-
वादिगुणैर्बहुश्रुतः साधूनां मध्ये प्रधानो भवति स्यात्॥ १७॥ जहाइन्नसमारूढे सूरे दढपरक्कमे उभओ नंदिघोसेणं एवं हवइ बहुस्सु-
ए॥ १७॥ यथा दृढपराक्रमो गाढदेहबलः शूरः सुभटः आकीर्णं अश्वसमारूढो जात्यतुरंगमाश्रितः उभयतो वामदक्षिणपार्श्वयोः नंदीघोषेण द्वा-
दशतूर्यनिनादेन सहितः केनचिदपि नाभिभूयते अन्योपि तदाश्रितो नाभिभूयते एवं जिनप्रवचनाश्वमाश्रितो बहुश्रुतो वादिराजो स्वाध्या-
यरूपनादघोषेण अन्यतीर्थैर्न पराभूयते॥ १८॥ जहा करेणुपरिकिन्ने कुंजरे सट्ठिहायणे बलवंते अप्पडिहए एवं॥ १८॥ य-
था करेणुकाभिर्हस्तिनीभिः परिकीर्णः परिवृतः षष्टिहायनः षष्टिवर्षीयो बलवान् कुंजरो हस्ती अन्यमदगजैरप्रतिहतो
भवति एवं अन्यशिक्षकादिधीभिः परिवृतोऽतिस्थिरो बहुश्रुतो बलिष्ठः परवादिभिरप्रतिहतो भवति॥ १९॥ जहा से तिक्खसिं-
गे जायखंधे विरायई वसभे जूहाहिवई एवं हवइ बहुस्सुए॥ २०॥ यथा तीक्ष्णशृंगो जातस्कंधः उपचितस्कंधो यूथाधिपतिर्गवां स्वा-
मी वृषभो विराजते एवं तीक्ष्णस्वान्यशास्त्रशृंगो गण्यो युक्तो गुरुकार्यस्कंधो ज्ञानस्कंधो यूथस्य साधुसमूहस्य स्वामी बहुश्रुतो
विराजते॥ २०॥ जहा से तिक्खदाढे उदग्गे दुप्पहंसए सीहे मियाण पवरे एवं॥ २१॥ यथा स तीक्ष्णदंष्ट्रः उदग्र उत्कटो दुःप्रधर्षोऽन्यै-
रनभिभवः सिंहो मृगाणां आरण्यप्राणिनां प्रवरः प्रधानः स्याद्भवति एवं परपक्षभेदवान् बहुश्रुतो नैगमादिनयरूपतीक्ष्णदंष्ट्रान्वितो गु-
णोत्कटोऽन्यतीर्थ्यानां मध्ये प्रवरो भवति॥ २१॥ जहा से वासुदेवे संखचक्कगयाधरे अप्पडिहयबले जोहे एवं॥ २२॥ यथा स वासुदेवो
विष्णुः शंखः पांचजन्यः चक्रं सुदर्शनं गदा कौमोदकी तासां धरः तेषां धरः सन् अप्रतिहतबलो योधः सुभटो भवति एवं ज्ञान-
दर्शनचारित्रधरो बहुश्रुतः कर्मारिपराभवे प्रतिस्पर्धी स्यात्॥ २२॥ जहा से चाउरंते चक्कवट्टी महिड्ढिए चउदसरयणाहिवई
एवं॥ २३॥ यथा स चतुर्दिग्विजयगजतुरंगरथसुभटात्मकैः अंतः शत्रुनाशो यस्य स चतुरंतः चक्रवर्ती षट्खंडभारताधिपो महर्द्धिकश्च-
तुर्दशरत्नाधिपतिः स्यात् एवं बहुश्रुतो भवति अस्यापि दानादिचतुर्विधधर्मेण कर्मारिनाशो स्यादिति चतुरंतः आमर्षौषध्याद्यृद्धयः संति

उत्तरा० टी०
२३

नउक्कलज्झाद्याः द्वउ ई[illegible]थमा नि प्रवालिस्फः ॥२२॥ जहा सहस्सक्खे वज्जपाणी पुरंदरे सक्के देवाहिवई एवं ॥२३॥ यथा सह
स्राक्षो वज्रपाणि[illegible] पुरंदरो दैत्यपुरनाशकः इंद्रो देवाधिपतिः स्यात् देवप्रकृष्टः स्यादेवं बहुश्रुतो ज्ञानातिशयलोचनधरः ब
[illegible]
[illegible] यथा स तिमिरांधकारविध्वंसको दिवाकरः उत्तिष्ठन् ऊर्ध्वं गच्छन् तेजसा ज्वलन्निव कालां मुंचन्निव स्यात् ए
वं बहुश्रुतोपि अज्ञानतिमिरापहः गीयते स्थानेषु विशुद्धाध्यवसायतस्तेजसा ज्वलन्निव स्यात् ॥ जहा से उ
डुवई चंदे नक्खत्तपरिवारिए पडिपुन्ने पुन्नमासी एवं ॥ यथा उडुपतिनक्षत्रपतिश्चंद्रो नक्षत्रग्रहपरिवारितः परिवृतः पूर्णिमासंप्रति
पूर्णः संपूर्णः स्यात् एवं बहुश्रुतो नेकसाधुपरिवृतः साधुपरिवृतः सम्यक् पूर्णिमास्यां प्रतिपूर्णः स्यात् ॥ जहा से सामाइयाणं को
ट्ठागारे सुरक्खिए नाणाधन्नपडिपुन्ने एवं ॥ यथा तेषां सामा जिकानां लोकसमूहानां नानाधान्यप्रतिपूर्णः कोष्ठागारो धान्या
श्रयः सुरक्षितो भवति एवं बहुश्रुतो नानाश्रुतपूर्णः सु रक्षितो भवति ॥ जहा सा दुमाण पवरा जंबू नाम सुदंसणा
